वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# रसगङ्गाधरे उत्तमोत्तमकाव्यस्योदाहरणे व्यङ्ग्यविमर्शः

**जिगर एम्. भट्टः***

किं नाम काव्यमिति प्रश्ने यथा आचार्याणां मतान्तराणि दृश्यन्ते तथैव कतिविधं काव्यं स्यादित्यपि प्रश्ने सन्ति मतान्तराणि। आचार्यमम्मटः त्रिविधं काव्यं प्रत्यपादयत् - उत्तमं मध्यमम् अधमम् अथवा ध्वनिकाव्यं[१] गुणीभूतव्यङ्ग्यकाव्यं[२] चित्रकाव्यं[३] चेति। विश्वनाथस्तु द्विविधमेव काव्यम् अमन्यत[४] - ध्वनिकाव्यं[५] गुणीभूतव्यङ्ग्यकाव्यम्[६] इति। किन्तु रसगङ्गाधरकारः पण्डितराजजगन्नाथः विशेषतया चतुर्विधं काव्यं[७] मनुते – उत्तमोत्तमम्[८] उत्तमं[९] मध्यमम्[१०] अधमं[११] च।

## उत्तमित्तमोकाव्यलक्षणम्

चतुर्षु काव्येषु उत्तमोत्तमस्य किं लक्षणं तथा कथं तस्य उत्तमोत्तमत्वम् इति पश्यामः। पण्डितराजजगन्नाथः उत्तमोत्तमकाव्यं लक्षयति यथा - **शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थम्**

---

* सहायकाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् - ३६२२६६

१ इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः। काव्यप्रकाशः १.४

२ अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्। तत्रैव १.५

३ शब्दचित्रं वाच्यचित्रम् अव्यङ्ग्यं त्ववरं स्मृतम्। तत्रैव १.५

४ काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यंचेति द्विधा मतम्। साहित्यदर्पणः ४.१

५ वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्। तत्रैव ४.१

६ अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये। तत्रैव ४,१३

७ तच्चोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा। रसगङ्गाधरः प्रथमाननम्, पृ.३७

८ शब्दार्थौ यत्र गुणीभावितात्मानौ कम्प्यर्थनभिव्यङ्क्तस्तदाद्यम्। तत्रैव पृ.३७

९ यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणम् तदिद्वितीयम्। तत्रैव पृ.६६

१० यत्र व्यङ्ग्यचमत्कारासमानधिकरणो वाच्यचमत्कारस्तत्तृतीयम्। तत्रैव पृ.७६

११ यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम्। तत्रैव पृ.७८

**अभिव्यङ्क्तस्तदाद्यम्**[१२] अर्थात् यत्र शब्दार्थौ आत्मानम् अप्रधानं कृत्वा कमपि चमत्कारजनकं प्रधानमर्थम् अभिव्यङ्क्तः = व्यञ्जनया बोधयतः तदुत्तमोत्तमं काव्यं कथ्यते। गुणीभावितात्मानौ इत्यस्य तात्पर्यमस्ति व्यङ्ग्यार्थापेक्षया अप्रधानीकृतस्वरूपौ। तौ चमत्कारातिशयम् अनिर्वचनीयं प्रधानमर्थं व्यञ्जनावृत्त्या यत्र बोधयतः तत्काव्यमुत्तमोत्तमं भवति। लक्षणे कमपीति पदस्य तात्पर्यमस्ति - यः अर्थः चमत्कारजनको भवति स एव प्रधानः। अतिगूढव्यङ्ग्ये स्फुटव्यङ्ग्ये च काचित् व्यङ्ग्यप्रतीतिर्जायते किन्तु तादृशं व्यङ्ग्यं चमत्कारि न भवति। अतः तस्य गणना गुणीभूतव्यङ्ग्ये क्रियते।

अत्र पूर्वपक्षो भवति यद् अपराङ्गं व्यङ्ग्यं वाच्यसिद्ध्यङ्गं व्यङ्ग्यं च चमत्कारिणी भवतः तस्मात् उत्तमोत्तमकाव्ये तयोरपि ग्रहणं स्यात्। अत्र पण्डितराजः कथयति - बन्धो ! लक्षणे शब्दार्थयोः अन्यदपि विशेषणम् अस्ति गुणीभवितात्मानौ इति। अपराङ्गं वाच्यसिद्ध्यङ्गं च व्यङ्ग्यं स्वयमेव गौणरूपेण वर्त्तते। ते आत्मानं कथङ्कारं गौणं कर्तुं प्रभवेताम् ? शब्दार्थौ वाच्यादी यत्रात्मानं गौणं विधाय चमत्कारिणं प्रधानम् अर्थं व्यञ्जनया बोधयतः तदेव उत्तमोत्तमं काव्यं नान्यत्।

## उत्तमोत्तमकाव्यस्य उदाहरणम्

पण्डितराजजगन्नाथः रसगङ्गाधरे स्वरचितान्येवोदाहरणानि प्रायच्छत्। तेन पूर्वमेव प्रतिज्ञातं यत् -

**निर्माय नूतनमुदाहरणानुरूपं काव्यं मयाऽत्र निहितं न परस्य किञ्चित्।**
**किं सेव्यते सुमनसां मनसाऽपि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण**[१३]**॥**

तस्मादुत्तमोत्तमकाव्यस्योदाहरणनिरूपणावसरे प्रतिज्ञानुरूपं स्वीयं पद्यमुदाहरति यथा -

**शयिता सविधेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान्।**
**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते**[१४]**॥**

अस्मिन् उदाहरणे नायकः आलम्बनविभावः, सविधे शयनमित्यनेनाक्षिप्तं शून्यस्थानमुद्दीपनविभावः, दरमीलन्नयना सती सा निरीक्षते इति अनुभावः, मनोरथान् सफलीकर्त्तुमनीश्वरा असमर्था इत्यनेन् लज्जा-औत्सुक्यादयः व्यभिचारिभावाः, तेषाञ्च विभावानुभाव-व्यभिचारिसंयोगाद् रतिः स्थायिभावः अभिव्यज्यते।

---

[१२] तत्रैव पृ.३७

[१३] तत्रैव पृ.७

[१४] तत्रैव पृ.३८

## कस्मिन् पदे व्यङ्ग्यम् ?

मम्मटाचार्यः काव्यप्रकाशे उत्तमकाव्यस्योदाहरणं निश्शेषच्युतचन्दनम्[१५] इत्यादि प्रतिपाद्य अत्र तदन्तिकमेव रन्तुं गताऽसीति प्राधान्येन अधमपदेन व्यज्यते[१६] इति विलिख्य अधमपदे व्यङ्ग्यम् अगृह्यात्। तर्हि शयिता सविधेऽप्यनीश्वरा.... इत्यादिपद्ये कस्मिन् पदे व्यङ्ग्यम् इत्यस्ति महान् प्रश्नः। प्रश्नमेनं समाधातुमत्र विनम्रः प्रयासः क्रियते।

## विशेषोक्तिरलङ्कारोऽत्र व्यज्यते इति पक्षः

केषाञ्चित् मतानुसारमत्र विशेषोक्तिरलङ्कारोऽभिव्यज्यते। कारणेषु सत्स्वपि कार्यस्य अभावः विशेषोक्तिः कथ्यते आचार्यैः[१७]। अस्मिन् पद्ये नायकनायिकयोः एकस्मिन्नेव पर्यङ्के शयनं सम्भोगशृङ्गारस्य कारणं वर्तते तथाप्यत्र संयोगस्य विरहात् कार्याभावः । अतोऽत्र विशेषोक्तिः प्राधान्येन अभिव्यज्यते इति पक्षः। उपर्युक्तपक्षस्य निराकरणम् – विशेषोक्तिरलङ्कारोऽत्र भवतु नाम, किन्तु नास्ति तस्मिन् प्रधानं व्यङ्ग्यम्। यतो हि काव्ये यदधिकं चमत्कारकारि भवति तदेव प्रधानं कथ्यते। अत्र विशेषोक्तेरप्यधिकं रतिः अनुभूयते, अतः रतेरेवात्र प्राधान्यं, न तु विशेषोक्तेः।

## नायिकागत-चुम्बनेच्छाऽत्र व्यङ्ग्यमिति पक्षः

अत्र कश्चित् कथयति यत् नायिका नायकस्य मुखं निरीक्षते इत्यनेन यद्ययं शयितः स्यात् तदाऽस्य आननं चुम्बेयम् इति नायिकागता चुम्बनेच्छा अत्र प्रधानं व्यङ्ग्यम् इति। पण्डितराजजगन्नाथः इदमपि निराकुर्वन्नाह - पद्येऽस्मिन् मनोरथान् सफलीकर्त्तुम् असमर्था इत्यत्र मनोरथपदेन नायिकायाः सर्वेऽपि मनोरथाः ज्ञायन्त एव। चुम्बनेच्छाऽपि मनोरथपदेन स्पष्टतया वाच्या वर्तते। तस्मादत्रापि नास्ति व्यङ्ग्यप्राधान्यम्। तर्हि पुनः पूर्वपक्षः आक्षिपति - मनोरथपदेन चुम्बेयम् इति विशिष्टेच्छा वाच्या नास्ति। अर्थात् चुम्बनेच्छायाः ग्रहणं मनोरथात् पृथक् करणीयम्। तदा तु अस्या चुम्बनेच्छायाः व्यङ्ग्यत्वं सेत्स्यति। पण्डितराजः अत्र समादधति - यदि मनोरथात् इच्छायाः पृथग्ग्रहणं क्रियते तदा चमत्कारो नानुभूयते। चमत्कारो नाम अलौकिकानन्दः, तद्विरहे नास्याः इच्छायाः व्यङ्ग्यत्वम्।

अत्राक्षिप्यते यत् चमत्कारस्य स्थितिः किं भवदधीना वर्त्तते? भवन्तः कथयन्ति तत्र चमत्कारः, नान्यत्र। अथवा युक्तियुक्तं किमपि तत्त्वमस्ति? इति। पण्डितराजः कथयति यत् न मयैव, सर्वैरपि

---

[१५] काव्यप्रकाशः, उदा.२-१

[१६] तत्रैव

[१७] विशेषोक्तिरखण्डेषु कारणेषु फलावचः। तत्रैव १०-१०८

आलङ्कारिकैः तस्यैव चमत्कारिणः व्यङ्ग्यस्य स्वीकारः कृतः, यस्मिन् व्यङ्ग्ये कथमपि अभिधावृत्तेः स्पर्शो न स्यात्। अभिधया स्पृष्टं व्यङ्ग्यं तादृशं चमत्कारं न जनयति। अतः चुम्बनेच्छायाः व्यङ्ग्यत्वं न सिद्ध्यति।

## पद्येऽस्मिन् रतिर्नास्त्येव इति पक्षः

कश्चिदत्राक्षिपति यत् नायकनायिकयोः अन्योन्यालम्बनः प्रेमाख्यः चित्तवृत्तिविशेषः यो भावः सः रतिः[१८] इति भवल्लक्षणाप्रतिपादितत्वात् अत्र नायिकाया एव रतिः निरीक्षणेन दृश्यते। नायकस्य काऽपि चेष्टा अत्र नोक्ता, अतः अन्योन्यालम्बनत्वं नास्ति, तद्विरहे च रतिरपि न सम्भवेत्। अतः इदं सम्भाव्यते यत् नायकः अन्यस्यां नायिकायाम् अनुरक्तः स्यात्। पण्डितराजः इदमपि समादधानो ब्रूते रतेः विरहस्तु तत्र यत्र नायकनायिकयोः अन्योन्यालम्बनत्वं न स्यात्, पद्येऽस्मिन् नायिकायाः विशेषणमस्ति "दयिता" इति। तेन नायकस्य प्रेमभावो नायिकायाम् अस्तीति अभिव्यज्यते तथा नायकोऽपि नायिकायाः प्रियः तस्मात् "दयिताननाम्बुजम्" इति प्रयोगः। उभयोरपि अन्योन्यालम्बनत्वेन अत्र रतेः स्थितिस्तु परिपुष्टा वर्त्तते इति।

## अत्र नायिकागता लज्जा एव प्रधानं व्यङ्ग्यमिति पक्षः

कश्चिदत्र ब्रूयात् दरमीलन्नयना इति पदेन नायिकानिष्ठलज्जा अत्र अभिव्यज्यते। पण्डितराजः निराकरोति यत् यदि लज्जा एव प्रधानं व्यङ्ग्यं मन्यते तर्हि निरीक्षते इति कथनस्य सर्वथा निरर्थकत्वं भवेत्। लजाया अभिव्यक्तिस्तु दरमीलन्नयनाय इत्यनेनापि भवति किन्तु तेन रतिस्तु नैव अभिव्यज्यते। अतः नास्ति दरमीलन्नयना इत्यस्मिन् प्रधानं व्यङ्ग्यम् इति।

## तर्हि पद्येऽस्मिन् व्यङ्ग्यं कस्मिन् पदे?

पण्डितराजः जगन्नाथः लज्जायाः गौणव्यङ्ग्यत्वेन स्वीकारं करोति। यतो हि वाच्यकोटौ यस्य गौणत्वं भवति, व्यङ्ग्यकोटौ अपि तस्य गौणत्वमेव तथा वाच्यकोटौ यस्य प्राधान्यं तस्यैव व्यङ्ग्यकोटावपि प्राधान्यम्। दरमीलन्नयना निरीक्षते इत्यस्य वाच्यकोटौ रतेः कार्यं निरीक्षणं प्रधानमस्ति तथा लज्जायाः कार्यं दरमीलन्नयनात्वं गौणमस्ति। व्यङ्ग्यकोटावपि गौणकार्यस्य दरमीलन्नयनात्वस्य कारणं लज्जा गौणतया भवति तथा प्रधानकार्यस्य निरीक्षणस्य कारणं रतिः प्रधाना भवति। तस्मादत्र निरीक्षते इति पदे वर्त्तते प्रधानं व्यङ्ग्यम् इति सहृदयहृदयसंवेद्यत्त्वात् चमत्कातजनकत्त्वाच्च।

---

[१८] "स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः स्थायिभावः।" रसगङ्गाधरः प्रथमाननम् पृ.१४१

## उपसंहारः

पण्डितराजजगन्नाथस्य पाण्डित्यविषये नास्ति कस्यापि शङ्काऽवकाशः। सः इदं पद्यमुदाहार्य अनेकविधाः सम्भावनाः संस्थापयति। अनेकविधाः पक्षाः प्रश्नाश्च तेन स्थाप्यन्ते निराक्रियन्ते च। विशेषोक्तेः व्यङ्ग्यत्वं, चुम्बनेच्छायाः व्यङ्ग्यत्वमाशङ्क्य सर्वमपि निराकरोति पण्डितराजः। अन्ततो गत्वा निरीक्षते इति पदे प्रधानं व्यङ्ग्यमिति स्वाभिमतं मतं स्थापयति। सम्पूर्णाऽपि इयं प्रक्रिया सहृदयानां जिज्ञासूनां भावकानाञ्च मनांसि भृशमाकर्षति। यावच्छक्यमेनं विषयं स्पष्टीकर्त्तुं मयाऽत्र प्रयत्नो विहितः तथाप्यत्र दोषाः स्युश्चेत् विद्वद्भिः समाधेयाः इति शम्।

## सन्दर्भग्रन्थाः

१. काव्यप्रकाशः, व्याख्याकारः आचार्यविश्वेश्वरः, प्रकाशनम् - ज्ञानमण्डल लिमिटेड वाराणसी, षष्ठं संस्करणम्, १९९८

२. साहित्यदर्पणः, व्याख्याकारः शेषराजशर्मा रेग्मी, प्रकाशनम् - चौखम्बा कृष्णदास अकादमी वाराणसी, पुनर्मुद्रितसंस्करणम् , २०१६

३. रसगङ्गाधरः, व्याख्याकारः- पण्डितमदनमोहनः झा, प्रकाशनम् – चौखम्बा विद्याभवन वाराणसी, पुनर्मुद्रितसंस्करणम्, २०१५